दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-08 ■ वर्ष-5 ■ अङ्क-334 | 1 | सितम्बर 23, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लद्वादशी
आश्विन् 07 प्रविष्टांशः मङ्गलमयः भवेत्

2 एशियाई-क्रीडा २०२६ : प्रधानमन्त्री महिला-क्रिकेटदलाय स्वर्णपदकं प्राप्तुं वर्धापनानि अयच्छत्

4 HP NEWS- केरल-राज्याय प्रति-यूनिटं १४.५० रूप्यकैः विद्युतः विक्रयणं करिष्यति हिमाचलप्रदेशः

08 "संस्कृतकथामञ्जरी" {२२} ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।। "अथ कन्यातुलितसुवर्णदानं नाम षोडशोपाख्यानम्"(१)

# राष्ट्रपति-द्रौपदी-मुर्मुः वर्यया द्विसप्तति-तमराष्ट्रियचलचित्रपुरस्कारैः कलाजगतः प्रतिभाः सम्मानिताः



गुजरातस्य पावन-भूमौ केवडिया-स्थिते एकता-नगरे राष्ट्रपतिपदासीना द्रौपदीमुर्मुः इत्यनया द्विसप्ततितम-राष्ट्रीय-चलचित्र-पुरस्कारैः कला-जगतः मूर्धन्य-प्रतिभावतः भूषिताः । एते सर्वोच्च-पुरस्काराः भारतीय-चलच्चित्रस्य श्रेष्ठतां प्रख्यापयन्ति। सूचना-प्रसारण-मन्त्रालयस्य नूतन-नीत्याः प्रभावेन एषः ऐतिहासिकोत्सवः राष्ट्रिय-राजधानी-दिल्ल्याः बहिः प्रथम-वारं आयोज्यते। राष्ट्रपतिः भारतीय चलचित्र जगतः उत्तम अभिनेत्रे अनन्त-नागाय प्रतिष्ठितं 'दादासाहेब फाल्के-पुरस्कारम्' अर्पितवती। श्रेष्ठ-अभिनेतुः राष्ट्रिय-सम्मानं तु 'भ्रमयुगम्' चलच्चित्रस्य कृते मम्मुट्टी-वर्याय तथा 'चन्दू-चैम्पियन्'-चलचित्रस्य कृते कार्तिक आर्यन इत्यस्मै च संयुक्त रूपेण प्रदत्तवती। 'अमरन्' चलचित्रस्य उत्कृष्ट-संयोजनाय राजकुमार-पेरियासामी श्रेष्ठ-निर्देशन-पुरस्कारं प्राप्तम्। अमुष्मिन्नेव क्रमे 'कल्कि इति चलच्चित्रं सर्व-मनोरञ्जक-लोकप्रिय-चलच्चित्रस्य पदवीं अवाप्नोत्। अपरञ्च, 'स्वातन्त्र्य-वीर-सावरकर' चलच्चित्रेण रणदीप हुडा प्रथम-निर्देशन-विभागे विजयं समासादितवान्। इतर विभागे मराठी-भाषायाः 'भङ्गार'- उत्तम चलच्चित्त्वेन विख्यातं जातम्, 'स्टैचू ऑफ यूनिटी' चलच्चित्राय आनन्द-एल-रायः श्रेष्ठ-निर्देशन-पुरस्कारं ग्रहीतवान्, अथ सङ्घाली-भाषायाः 'अङ्गेन्' चलचित्रस्य कृते रवि-राज-मुर्मुः प्रथम-निर्देशन-सम्मानं प्राप्तवान्।

## नवम-अन्ताराष्ट्रिय-जल-सप्ताहस्य सम्मुद्घाटनम्




नवदेहल्यां जल-सप्ताहस्य सम्मुद्घाटनं कुर्वन् उपराष्ट्रपतिः राधाकृष्णन जल-संरक्षणम् अत्यन्तमपेक्षितम् इति समदीदृशत्। सम्बोधने तेन जलस्य मितव्यय-प्रयोगाय अत्याग्रहो वहितः संरक्षणाय च महद्-आह्वानम् अकारोत् । उपराष्ट्रपतिना सी. पी. राधाकृष्णेन जल-प्रबन्धन-जटिलता-निरसनाय सर्व-हितधारकाणां समवायि-सहयोगाय प्रयासः समाहूतः । जल-प्रबन्धन-जटिलताः विवृण्वन् सः न्यवेदयत् यत् कापि संस्था एकाकिनी समस्याः सोढुं न पारयति । अतः तेन सर्व-हितधारकाणां समन्वित-सहयोगः समाहूतः ।

## मादक-द्रव्य-दुर्व्यसन-उन्मूलनाय तृतीय-राष्ट्रिय-एएनटीएफ-प्रमुख सम्मेलनस्य केन्द्रीय-गृह-मन्त्रिणा विहितं सम्मुद्घाटनम्



केन्द्रीय-गृह-मन्त्री अमितशाहः नवदेहल्यां राज्य-केन्द्रशासित प्रदेशानां मादक-द्रव्य-विरोधि-विशेष-बल-प्रमुखानाम् तृतीय-राष्ट्रिय-सम्मेलनस्य उद्घाटनम् अकरोत्। एतत् द्विदिवसात्मकं सम्मेलनं भावि-सन्ततेः मादक-द्रव्य-दुर्व्यसनात् सुरक्षा-प्रदानाय एका महती सुदृढा पीठिका भूत्वा सेविष्यते। नारकोटिक्स कंट्रोल-ब्यूरो इत्यनेन संयोजिते अस्मिन् अधिवेशने षट्त्रिंशत् राज्य-केन्द्रशासित प्रदेशेभ्यः एएनटीएफ-प्रमुखाः भागं गृह्णन्ति ।

## अद्यतनीयं सुभाषितम्

**असम्भवं हेममृगस्य जन्मः**
**तथापि रामो लुलुभे मृगाय।**
**प्रायः समापन्नविपत्तिकाले**
**धियोऽपि पुंसां मलिना भवन्ति।।**

भावार्थः- प्रायः देखा गया है कि विपत्ति के समय लोगों की बुद्धि भ्रष्ट हो जाती है। इसी कारण राजा रामचन्द्र यह जानते हुए भी कि स्वर्णमृग का जन्म होना असम्भव है वे उसे मारने का लालच कर बैठे।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## भारतीय-उच्चायोगेन पर्यटन-वीज़ा-पत्रेण मलेशिया-देशं गच्छन्तः भारतीय-नागरिकाः तत्र कार्यं न स्वीकर्तुम् प्रबोधिताः



कुआलालम्पुरस्थेन भारतीय-उच्चायोगेन पर्यटन-वीज़ा-पत्रेण मलेशिया-देशं गच्छन्तः भारतीय-नागरिकाः तत्र कार्यं न स्वीकर्तुम् प्रबोधिताः। एकस्मिन् परामर्शे उच्च-आयोगः अवदत् यत् त्रिंशत् दिवसात्मकस्य वीजा-मुक्त-सौकर्यस्य उपयोगेन कार्यं प्राप्तुं मलेशिया-देशं प्रति आगच्छतां भारतीय-नागरिकाणां संख्या वर्धिता अस्ति। बहवः भारतीयाः नागरिकाः मिथ्या-कार्य-प्रतिज्ञायुक्तैः अविवेकी-अभिकर्तृभिः भ्रमिताः भवन्ति, येन अतिवासः, अवैध-स्थितिः, शोषणं, विधिसम्मत-कार्याचरणं च भवन्ति। उच्च-आयोगः अवदत् यत् वास्तविक-पर्यटकाः वैधं सत्यापनीयं च प्रलेखम् अवश्यं वहन्तु, यथा प्रत्यागमन-यात्रानुमति चिटीकायाः पुष्टिः, आवास-आरक्षणं, आगमन-दिनाङ्कस्य दिनत्रयानन्तरं मलेसियन्-डिजिटल्-आगमन-पत्रस्य ऑनलाइन्-प्रस्तुतीकरणं, न्यूनतमं षट् मासस्य वैधतायुक्तं पास्पोर्ट् च भवेत्।



## अश्विनीवैष्णवेन सर्वेभ्यः राज्येभ्यः स्व-पर्यटन-स्थलानां प्रस्तावाः आहूताः

केन्द्रीय-सूचना-तथा-प्रसारण-मन्त्री अश्विनी वैष्णवः अहमदाबाद्-विमानपत्तनं सम्प्राप्य महतीं नीतिगत-घोषणाम् अकरोत्। तेन प्रोक्तं यत् प्रधानमन्त्रिणः नरेन्द्र-मोदिनः प्रेरणया प्रभाविताः सन्तः अग्रिमाः राष्ट्रीय चलच्चित्र-पुरस्कार-समारोहाः देशस्य श्रेष्ठ-पर्यटन-स्थलेषु आयोजयिष्यन्ते। अहमदाबाद्-विमानपत्तने वार्ताहरान् आहूय तेन सर्वेभ्यः राज्येभ्यः स्व-पर्यटन-स्थलानां प्रस्तावाः आहूताः। यस्य राज्यस्य प्रस्तावः श्रेष्ठो भविष्यति, तत् राज्यम् अग्रिमपुरस्कार-समारोहस्य आतिथ्यं विधास्यति।



## मन्द-कालेऽपि भारतीय-अर्थव्यवस्था अष्ट-प्रतिशत-समीपम् अबाधित-गत्या संवर्धते - निर्मला सीतारमन

केन्द्रीय-वित्त-मन्त्री निर्मला सीतारमन नवदेहल्याम् अखिल भारतीय-प्रबन्धन-सङ्घस्य त्रिपंचाशत्-तमाधिवेशने प्राख्यापयत् यत् भारतस्य अग्रिम-संवृद्धिः गुणवत्ता-प्रतिष्ठायाम् एव सम्भवेत्। सा सर्व-उत्पादन-शालाभ्यः प्रबन्धन-मण्डलेभ्यश्च उच्च-मानदण्ड-धारणम् अन्वशासत्। वित्त मन्त्री सीतारमन समदीदृशत् यत् वैश्विक व्यापार-शृङ्खलायाम् अनिश्चिततायां सत्यां त्रि-प्रतिशतात् अधः मन्द-कालेऽपि भारतीय-अर्थव्यवस्था अष्ट-प्रतिशत-समीपम् अबाधित-गत्या संवर्धते ।

## भारतीय ऋतुविज्ञान-विभागः

तटीय-आन्ध्रप्रदेशे ओडिशा-राज्ये च अतिवृष्टपरा संचेतना प्रसारिता । भारतऋतुविभागेन दिवसे तटीय-आंध्रप्रदेशे ओडिशायां विभिन्नेषु स्थानेषु अत्यधिक वृष्टिपरं पूर्वानुमानं प्रकटितम्। असम, मेघालय, छत्तीसगढ़, गाङ्गेय-पश्चिम बंगाल, झारखंड-राज्येषु अपि अति वृष्टिः भवितुम् अर्हति।

## भारतीय-वायुसेना-दलेन, जापान-वायु-आत्मरक्षादलेन च जोधपुर-वायुसेना स्थले द्वैपाक्षिक-वायु-अभ्यासः सम्पन्नः



भारतीय-वायुसेना-दलेन, जापान-वायु-आत्मरक्षादलेन च जोधपुर-वायुसेना स्थले द्वैपाक्षिक-वायु-अभ्यासः वीर-गार्डियन्-विंशति षड्विंशति इति सम्पन्नः। रक्षामन्त्रालयः अवदत् यत् अन्ताक्रियाशीलतां वर्धनाय, द्वयोः वायुदलयोः मध्ये सामरिकसहभागित्वं सुदृढीकरणाय च अयं अभ्यासः महत्त्वपूर्ण-मञ्चरूपेण सिद्धः। चतुर्दश-दिवसात्मके संयुक्त-प्रशिक्षणावधौ, उभयोः सैन्यदलयोः दृश्यपरिधि-युद्धस्य अन्तर्गतानि विस्तृत-उन्नत-उड्डयन-अभियानानि, समन्वित-बहु-विमान-अभियानानि च आसन्।



## एशियाई-क्रीडासु भारतीय-पुरुष-बैडमिण्टन-दलेन उपांत्य-पूर्व-चक्रे आयोजक-जापान-देशं पराजित्य भारताय पदकं प्राप्तम्

एशियाई-क्रीडासु भारतीय-पुरुष-बैडमिण्टन-दलेन जापान-देशे आयोजिते उपांत्य-पूर्व-चक्रे आयोजक-जापान-देशं पराजित्य भारताय पदकं प्राप्तम्। तदनन्तरं सात्विकसाईराज-चिराग-शेट्टी-युगलेन पूर्व-विश्व-विजेतारौ होकी-कोबायाशी-वर्यरूपिणौ पराभूय भारतस्य अग्रतां द्वे-शून्यम् इति प्रवर्धितम्। अन्ते च आयुष-शेट्टी-वर्येण विश्वस्य षोडशतम-वरीयं कोकी वातानाबे-वर्येण सह द्वन्द्वे 21-10, 21-19 इति अंकैः विजयं प्राप्य भारतस्य विजयपदकं च सुनिश्चितम् । अद्य उपांत्य-चक्रे भारतस्य स्पर्धा चीन-कोरिया-देशयोः मध्ये प्रवृत्तस्य द्वन्द्वस्य विजेत्रा सह भविष्यति।



## एशियाई-क्रीडा २०२६ : प्रधानमन्त्री महिलाक्रिकेटदलाय स्वर्णपदकं प्राप्तुं वर्धापनानि अयच्छत्

प्रधानमन्त्री नरेन्द्रमोदी जापानदेशस्य नागोयानगरे एशियाईक्रीडायां स्वर्णपदकं प्राप्तुं महिलाक्रिकेटदलाय वर्धापनानि अयच्छत्। भारतीयक्रिकेट्-क्रीडायाः कृते एषा महतीमुपलब्धिम् इति वर्णयन् मोदीमहोदयः अवदत् यत् एषः विजयः अस्याः क्रीडायाः संस्करणस्य भारतस्य प्रथमं स्वर्णपदकमभवत्। सामाजिकमाध्यमेन सः प्रभावशालीं प्रदर्शनेन, आत्मविश्वासेन, कौशलेन, उत्तमेन सामूहिककार्येन च परिपूर्णम् इति वर्णितवान् । प्रधानमन्त्रिणा उक्तं यत् दलेन देशः गौरवान्वितः कृतः। एषः विजयः देशे सर्वत्र क्रिकेट्-क्रीडकानां युवानां प्रेरणा दास्यति । अवधेयं वर्त्तते यत् एशियाई-क्रीडासु श्रीलङ्का-दलमपाकृत्य भारतीय-महिला-क्रिकेट्-दलेन प्रासाधितं स्वर्णपदकम्; अंताराष्ट्रिय-प्रतिस्पर्धासु एकादश-सहस्र-धावनाङ्कान् सञ्चित्य स्मृति-मन्धानायाः अनन्यः ऐतिहासिकः कीर्तिमानः।

## पुरुष-क्रिकेट्-क्रीडायां वृष्ट्या बाधितायां, पञ्च-क्षेपचक्रीय-विंशति-प्रति-विंशति-अन्ताराष्ट्रिय-क्रीडायां, आतिथेय-जापान-देशः द्वाभ्यां धावनांकाभ्यां पराजितः।

पुरुष-क्रिकेट्-क्रीडायां, सनो-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे, वृष्ट्या बाधितायां, पञ्च-क्षेपचक्रीय-विंशति-प्रति-विंशति-अन्ताराष्ट्रिय-क्रीडायां, आतिथेय-जापान्-देशः द्वाभ्यां धावनांकाभ्यां पराजितः। विंशति-प्रति-विंशति-अन्ताराष्ट्रिय-क्रीडासु सूपर-ओवर-विजयान अन्तर्भाव्य भारतस्य एषः द्विशत-तमः विजयः आसीत्।

## बिलासपुर-जनपद-न्यायालयस्य द्वितीय-तलात् अधः कूर्दित्वा पलायितः 'चिट्टा' मादकद्रव्यस्य अभियुक्तः

हिमसंस्कृतवार्ताः- बिलासपुरम्।

बिलासपुर- जनपद- न्यायालयस्य द्वितीयतलात् अधः कूर्दनेन एकः अभियुक्तः आरक्षिबलात् पलायितः। अयं जनः 'चिट्टा' मादक-पदार्थसम्बद्धे अभियोगे स्वारघाट-आरक्षि-स्थानकेन बन्दीकृतः आसीत्। आरक्षि-प्रशासनेन पलायितस्य अस्य अभियुक्तस्य अन्वेषणाय तीव्रं चक्रव्यूहं विरचितं, स्थाने-स्थाने च मार्ग-अवरोधकाः स्थापिताः सन्ति। उल्लेखनीयं यत् हिमाचलप्रदेश-सर्वकारेण मादक-द्रव्य- तस्कराणां निग्रहणाय विशेष-अभियानं प्रवर्त्तितम् अस्ति, यदन्तर्गतं तस्कराः निरन्तरं गृह्यन्ते। अस्यामेव शृङ्खलायां स्वारघाट-आरक्षिदलेन एकः 'चिट्टा' तस्करः गृहीतः आसीत्, यश्च विधिकप्रक्रियायै न्यायालयं प्रति समुपस्थापितः। तस्मिन्नेव काले अभियुक्तः आरक्षि- कर्मचारिणः वञ्चयित्वा द्वितीय-तलात् अधः कूर्दनेन पलायनं कृतवान्। साम्प्रतं तस्य पुनर्गणनाय आरक्षिविभागेन व्यापकः अन्वेषण-प्रयासः प्रारब्धः।

# हिमाचले अहोरात्रं (२४ होराः) उद्घाटितानि भविष्यन्ति

## आपणानि वाणिज्यिक-प्रतिष्ठानानि च; एते नियमाः भविष्यन्ति प्रवृत्ताः



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशे साम्प्रतं सर्वाणि आपणाणि वाणिज्यिक- प्रतिष्ठानानि च चतुर्विंशतिहोराः सप्तदिनानि (२४×७) निरन्तरं सञ्चालयितुं शक्यन्ते। राज्यसर्वकारेण व्यापारसुगमतां वर्धयितुं प्रतिष्ठानानां चापि अहोरात्रं सञ्चालन-सौकर्यार्थं 'हिमाचलप्रदेश- आपण- एवं- वाणिज्यिक- प्रतिष्ठान- अधिनियम- १९६९' इत्यस्य ९ तथा १० इति धारयोः प्रावधानेषु शिथिलता प्रदत्ता। श्रम-रोजगार तथा समुद्रपार-नियोजन-विभागेन २२ सितम्बर २०२६ दिनाङ्के निर्गमितया अधिसूचना-माध्यमेन इयं शिथिलता सद्यःप्रभावेण प्रवर्तिता, या च आगामि- एकवर्षं यावत् प्रभाविनी स्थास्यति। यद्यपि प्रतिष्ठानेभ्यः अहोरात्र-सञ्चालनस्य अनुमतिः प्रदत्ता, तथापि कर्मचारिणां कार्य-होरासु काऽपि अतिरिक्त-शिथिलता न दीयते। अधिसूचनानुसारं कस्यापि कर्मचारिणः पार्श्वे विधानानुसारं निर्धारितायाः सीमायाः अधिकं कार्यं कारयितुं न शक्यते। नियमानुसारं प्रत्येकस्मै कर्मचारिणे साप्ताहिकविरामः अनिवार्यरूपेण दातव्यः भविष्यति, निर्धारितसीमातः अधिककालं यावत् अतिरिक्तकार्यं कारयितुम् अपि अनुमतिः न स्थास्यति।

### महिलाकर्मचारिभ्यः विशेषसुरक्षाव्यवस्थाः

सर्वकारेण प्रतिष्ठानस्वामिनः (नियोक्तारः) कर्मचारिणां सुरक्षायाः, स्वास्थ्यस्य, कल्याण-सम्बद्धानां च पर्याप्तानां प्रबन्धानां दृढीकरणाय समादिष्टाः। विशेषतः रात्रौ कार्यं कुर्वतीनां महिला- कर्मचारिणीनां कृते सर्वकारस्य ३१ जुलाई २०२५ दिनाङ्कस्य अधिसूचनायां प्रतिपादितानां नियमानां समयानां च कठोरतया पालनम् अनिवार्यं भविष्यति। अधिसूचनायां स्पष्टीकृतं यत् समैः संस्थानैः १९६९-अधिनियमस्य तदन्तर्गत-निर्मित- नियमानां सहैव अन्येषां श्रमविधीनाम् अपि पूर्णतया अनुपालनं करणीयम्।

# हिमाचले विमान-संयोजकतायाः विस्तारः

## दशवर्षेभ्यः (१०) त्रिपक्षीय-सहमतिपत्रे अभवत् हस्ताक्षरम्



**हिमसंस्कृतवार्ताः- नवदेहली।**
हिमाचलप्रदेशे विमानसंयोजकतां तत्सम्बद्धाः सुविधाश्च सुदृढीकर्तुं हिमाचल-सर्वकारस्य, केन्द्रीय- नागर- विमानन- मन्त्रालयस्य, 'भारतीय- विमानपत्तन- प्राधिकरणस्य' मध्ये त्रिपक्षीय- सहमतिपत्रे हस्ताक्षरं विहितम्। नवदेहल्यां संशोधितायाः 'क्षेत्रीय- संयोजकता-योजनायाः' (RCS- UDAN) अन्तर्गतम् अस्य अनुबन्धस्य निष्पादनं केन्द्रीय- नागर- विमानन-मन्त्रिणः किञ्जरापु- राममोहननायडूमहोदयस्य केन्द्रीय- राज्यमन्त्रिणः मुरलीधर- मोहोळ-महोदयस्य च उपस्थितौ सम्पन्नम्। हिमाचल-सर्वकारस्य पक्षतः पर्यटन- एवं- नागरिक-उड्डयन- विभागस्य सचिवेन सन्दीपकुमारमहोदयेन अस्य सहमति-वृत्तस्य विवरणं प्रदत्तम्।
अस्य सहमति-पत्रस्य अन्तर्गतं विद्यमानानां नूतनानां च 'उड़ान' विमानसेवानां सहैव विमानसम्पर्कस्य सम्बद्धसुविधानां च विकासाय सञ्चालनाय च परस्परसहयोगस्य एकं व्यापकं प्रारूपं विरचितम् अस्ति। अयं त्रिपक्षीय-अनुबन्धः आगामि-दशवर्षाणां (१०) कालावधौ प्रभावी स्थास्यति। वर्तमानव्यवस्थायाः अनुसारं राज्यसर्वकारेण विंशतिप्रतिशतं (२०%) 'व्यवहार्यता- अन्तर- वित्तपोषणं' दातव्यं भविष्यति, यत्रैव अवशिष्टम् अशीति-प्रतिशतं (८०%) व्ययं केन्द्र-सर्वकारः वहिष्यति। अस्यानन्तरं विमानसंस्थाः निविदाप्रक्रियायां भागं ग्रहीष्यन्ति, यत्र विमानसेवायै मार्गाः अपि निर्धारिताः भविष्यन्ति।

### ९०:१० अनुपाताय मुख्यमन्त्रिणः सुक्खूमहोदयस्य आग्रहः

सचिवेन सन्दीपकुमारेण विज्ञापितं यत् हिमाचलस्य कठिनां भौगोलिकावस्थां दुर्गम-पर्वतीय-क्षेत्रेषु विमानसञ्चालनस्य अत्यधिकं व्ययं च विचिन्त्य मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन सम्प्रत्येव केन्द्रीय-नागर-विमाननमन्त्रिणः पुरतः वीजीएफराशौ ९०:१० इत्यस्य संशोधित-अनुपातस्य प्रवर्तनाय प्रबलः आग्रहः कृतः। अस्याम् अभ्यर्थनायां केन्द्रसर्वकारस्य पक्षतः नवति-प्रतिशतं (९०%), राज्य-सर्वकारस्य पक्षतः दशप्रतिशतं (१०%) वित्तीयसाहाय्यस्य व्यवस्थापनं याचितम्।

# गुलेर-दुर्गं अङ्गीकरिष्यति केन्द्रीय- विश्वविद्यालयः, काङ्ड़ा-मण्डलस्य नन्दपुरे विश्व- पर्यटन- सप्ताह- काले अवदत् शिमला- आईआईएएस-निदेशकः



**हिमसंस्कृतवार्ताः- काङ्ड़ा।**
हिमाचलप्रदेश- केन्द्रीय- विश्वविद्यालयः गुलेरक्षेत्रस्य ऐतिहासिकन्यासं दुर्गं विकासस्य पर्यटनस्य च नूतनमार्गेण संयोजयितुं तं प्राचीनदुर्गम् अङ्गीकरिष्यति। इदं वक्तव्यं 'भारतीय- उच्चाध्ययन- संस्थानस्य' निदेशकेन प्रो. डॉ. हिमांशुकुमार- चतुर्वेदीमहोदयेन नन्दपुरे विश्व-पर्यटनसप्ताहस्य उत्सवे प्रदत्तम्। विश्व- पर्यटन-सप्ताहस्य अवसरे 'पर्यटन, यात्रा एवं आतिथ्य-प्रबन्धन- विद्यापीठस्य' पक्षतः आयोजिते 'गुलेर-बौद्धिक- विमर्शः, परम्परायाः पुनर्कल्पनायाः रूपरेखा' इति सङ्गोष्ठ्यां गुलेरक्षेत्रस्य ऐतिहासिकां, सांस्कृतिकां, कलात्मकां च परम्परां संरक्ष्य तां पर्यटनविकासेन सह संयोजयितुं विस्तृतचर्चा अभवत्। कार्यक्रमानन्तरं वार्ताहरैः सह सम्भाषणे निदेशकः प्रो. डॉ. हिमांशुकुमार चतुर्वेदी गुलेरक्षेत्रं 'काङ्ड़ा- लघु-चित्रकलायाः' प्रमुखां भूमिं प्रतिपादयन् अवदत् यत् अस्य क्षेत्रस्य वैभवः केवलम् इतिहासरूपेण न अवलोकनीयः, अपि तु भाविसन्ततिभिः सह अस्य संयोजनम् अतीव आवश्यकम्। कार्यक्रमकाले 'राघवगुलेरी- प्रासादे' छात्राणां कलाकृतीनां, काङ्ड़ाचित्रकलायाः, पारम्परिक- हस्तशिल्पानां च प्रदर्शनी अपि आयोजिता।

### काङ्ड़ा-चित्रकलां पाठ्य-क्रमेण संयोजयितुं विमर्शः

विद्वद्भिः काङ्ड़ा-लघु-चित्रकलां नूतनसन्तत्या सह संयोजयितुम् आवश्यकता प्रतिपादिता। एतां कलां शैक्षणिकपाठ्यक्रमे समावेशयितुं, विद्यार्थिनः कलायाः सूक्ष्मताभिः परिचाययितुं, स्थानीय-कलाकाराणां सहभागितां संवर्धयितुं च कार्यं करणीयम् इति प्रतिपादितम्। अनेन सहैव युवकाः, महिलाः, ग्रामीणजनाश्च परम्परा- आधारित-पर्यटन- गतिविधिभिः सह संयोजनीयाः इत्यस्मिन् विषयेऽपि विशेषबलं दत्तम्।

# HP NEWS- केरल-राज्याय प्रति-यूनिटं १४.५० रूप्यकैः विद्युतः विक्रयणं करिष्यति हिमाचलप्रदेशः

**हिमसंस्कृतवार्ताः- शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खूमहोदयः स्पष्टशब्दैः उद्घोषितवान् यत् विद्युद्दरं स्वयं हिमाचलसर्वकारः एव निर्धारयिष्यति। एतदेव विचिन्त्य केरल- सर्वकारेण सह विद्युतः क्रयण-विक्रयण-विषये प्रतियूनिटं सार्धचतुर्दश (१४.५०) रूप्यकाणां मूल्यं निश्चीयते। साम्प्रतं तमिलनाडु-राज्याय प्रति-यूनिटं सार्ध-त्रयोदश (१३.५०) रूप्यकैः विद्युत् विक्रीयते; मार्चमासात् परं मूल्यस्य पुनरीक्षणं भविष्यति। सोमवासरे 'एलर्जली फेज-टू' भवने नूतन- मुख्यमन्त्री- कार्यालयस्य उद्घाटनानन्तरं सः अवदत् यत् 'व्यवस्थापरिवर्तनेन' प्रचलतः सर्वकारस्य प्रयासानां फलेन २०३२ तमे वर्षे हिमाचलप्रदेशः देशस्य समृद्धतमं राज्यं भविष्यति। तस्मिन् काले समस्तानां व्ययानाम् अनन्तरम् अपि प्रदेशसर्वकारस्य वार्षिकम् आयं सप्तसहस्र- कोटिरूप्यकेभ्यः (७००० कोटि) अधिकं भविष्यति। मुख्यमन्त्रिणा उल्लिखितं यत् पूर्वं राज्य- विद्युन्मण्डलं पञ्च वा सार्धपञ्चरूप्यकैः विद्युतः विक्रयणं करोति स्म; किन्तु अधुना विद्युत्विक्रयस्य उत्तरदायित्वम् 'ऊर्जा-निदेशालयः' सम्पादयिष्यति, व्यस्तसमयेषु च विद्युतः अधिकं मूल्यं लप्स्यते। सः अग्रे विज्ञापितवान् यत् निवृत्त-कर्मचारिभ्यः शोधनानन्तरम् आगामिमासेषु सेवारत- कर्मचारिभ्यः अपि चरणबद्ध-रूपेण अवशिष्टांशं प्रदास्यते।

## पञ्चकूला-नगराय जलं दास्यति हिमाचलम्

हरियाणाराज्यस्य पञ्चकूलानगरस्य नागरीय-औद्योगिकक्षेत्रेषु पेयजलस्य आवश्यकतां पूरयितुं प्रदेशसर्वकारः विचारं करोति। एतदर्थं आन्तर्भौमिकमार्गस्य माध्यमेन पञ्चकूलापर्यन्तं जलं प्रापयिष्यते। मुख्यमन्त्री प्रतिपादितवान् यत् कुत्रापि एतादृशं बन्धनं नास्ति यत् हिमाचल-सर्वकारः शतद्रू-नद्याः (सतलुज) जलं न रोद्धुं शक्नोति अथवा स्वहिताय तस्य उपयोगं कर्तुं न प्रभवति। अत एव प्रदेशसर्वकारः जलविक्रयस्य सम्भावनासु गभीरं मन्थनं करोति।

## मण्डी-मण्डले भाजपादलस्य काठिन्येन पञ्च आसनानि- मुख्यमन्त्री

मुख्यमन्त्रिणा अधिकारः कृतः यत् आगामिषु विधानसभानिर्वाचनेषु भाजपादलं मण्डीमण्डले काठिन्येन पञ्च आसनानि एव प्राप्तुं शक्ष्यति। सः व्यङ्ग्यं कुर्वन् अवदत् यत् किञ्चित् कालपूर्वं भाजपादलं पञ्चवर्गाणां सङ्घटनम् आसीत्, किन्तु अधुना तत्र दलगत-कलहः अति-विस्तीर्णः जातः तथा च गुटानां सङ्ख्या पञ्चतः षट् सञ्जाता। सोलन-सिरमौर-मण्डलयोः काङ्ग्रेस-दलं बहुषु आसनेषु विजयं प्राप्स्यति। यथा यथा विधानसभानिर्वाचनानि समुपस्थास्यन्ति, तथा तथा काङ्ग्रेसदलस्य स्थितौ आशातीत-परिष्कारः भविष्यति।




# ललितनारायण-मिथिला-विश्वविद्यालये द्विशत-स्वयंसेवकानां चतुर्थम् आपदा- प्रबन्धन- प्रशिक्षण- शिबिरं सम्पन्नम्

## लालूप्रसादयादवः प्रथमम्, श्रुतिसिन्हा द्वितीयं, सुरभिकुमारी च तृतीयं स्थानम् अलभन्त

हिमसंस्कृतवार्ताः- राघवनाथ झा, दरभङ्गा।
ललितनारायण-मिथिला-विश्वविद्यालयस्य राष्ट्रिय-सेवा-योजनाप्रकोष्ठस्य तत्त्वावधाने, बिहार- राज्य-आपदा- प्रबन्धन- प्राधिकरणस्य (पाटलिपुत्रम्) सौजन्येन समायोजितस्य सप्तदिवसीयस्य चतुर्थस्य 'आवासीय-युवा-आपदामित्र-प्रशिक्षण-शिबिरस्य' भव्यः समापनसमारोहः विश्वविद्यालयस्य जुबिली सभागारे विधिवत् सम्पन्नः। विश्वविद्यालयस्य कुलपतेः प्राध्यापक- सञ्जयकुमार- चौधरि-महोदयस्य कुशलमार्गदर्शने समनुष्ठिते अस्मिन् शिबिरे दरभङ्गा-मधुबनी-समस्तीपुर-मण्डलानां विविध- महाविद्यालयेभ्यः समागताः द्विशतं (२००) स्वयंसेवकाः दक्षतापूर्वकं प्रशिक्षणम् अगृह्णन्। अनेन सहैव चतुर्षु समूहेषु आहत्य अष्टशतं (८००) स्वयंसेवकाः आपदाप्रबन्धनस्य आवासीयप्रशिक्षणेन समलङ्कृताः जाताः। अस्मिन् शिबिरे शारीरिकव्यायामः (पीटी), योगाभ्यासः, प्राणायामः, प्राकृतिक-विपत्ति-प्रबन्धनम्, प्राथमिक- उपचारः, सङ्कटकालीन-रक्षा-कार्याणि, साहाय्यवितरण-विधयश्च सूक्ष्मतया शिक्षिताः। परीक्षानुशीलनेन, अनुशासनपालनेन, सांस्कृतिकप्रस्तुतिभिः च समेषां समग्र-प्रदर्शनाधारं विमृश्य शीर्षस्थाः विंशतिः स्वयंसेवकाः चयिताः। एषु स्नातकोत्तर- गणितविभागस्य लालूप्रसाद यादवः प्रथमं, जी. के. पी. डी. महाविद्यालय-कर्पूरीग्रामस्य श्रुतिसिन्हा द्वितीयं, डब्ल्यू. आई. टी. दरभङ्गायाः सुरभिकुमारी तृतीयं स्थानं प्राप्नुवन्। एतेभ्यः शीर्षस्थेभ्यः समेभ्यः प्रशस्तिपत्राणि स्मृतिचिह्नानि च प्रदाय सम्मानिताः, अवशिष्टेभ्यः अशीत्यधिक-शतसङ्ख्यकेभ्यः (१८०) स्वयंसेवकेभ्यः अपि सहभागिता-प्रमाणपत्राणि वितरितानि। समापनसमारोहस्य अध्यक्षतां छात्रकल्याण-संकायाध्यक्षः प्राध्यापकः अशोककुमारमेहता महोदयः अकरोत्। विश्वविद्यालयस्य भू-सम्पदा-पदाधिकारी डॉ. कामेश्वर पासवानः विशिष्टातिथिरूपेण उपस्थितः आसीत्। शिबिर-संयोजकः डॉ. आर. एन. चौरसिया महोदयः सम्पूर्ण- प्रशिक्षणस्य सविस्तरं वृत्तम् (प्रतिवेदनम्) उपास्थापयत्। राज्य-आपदा-प्रतिवादनबलस्य मुख्यप्रशिक्षकः रूपेशकुमारपासवानः स्वोद्बोधने न्यवेदयत् यत्- "एते निपुणाः स्वयंसेवकाः समाजे इतरेभ्यः जनेभ्यः अपि आपदा-प्रबन्धनस्य शिक्षणं दत्त्वा एकां सुदृढां रक्षाशृङ्खलां निर्मातुं शक्नुवन्ति।"
समारोहस्य कुशलं सञ्चालनम् अक्षयकुमारझा-महोदयेन सम्पादितम्, अन्ते च राष्ट्रिय- सेवा-योजनायाः कार्यक्रमानुष्ठान-पदाधिकारिण्या डॉ. रीताकुमार्या समेषां प्रति कृतज्ञतापूर्वकं धन्यवाद-ज्ञापनं विहितम्।

# शान्तिरेव प्रगतेः आधारः विश्वशान्तिदिवसस्य अवसरे महर्षिमहेश-योगिवैदिकविश्वविद्यालयेन शान्तेः सद्भावस्य च संवर्धनाय विशेषः प्रयासः



ब्रह्मस्थान-करौंदी, कटनी, मध्यप्रदेशे स्थिते महर्षिमहेशयोगिवैदिकविश्वविद्यालये दिनाङ्के २१ सितम्बर २०२६, सोमवासरे, 'विश्वशान्तिदिवसस्य' (International Day of Peace) विशेषावसरे भव्यकार्यक्रमस्य आयोजनम् अभवत्। अस्मिन् अवसरे विश्वविद्यालयस्य प्रशासनिकभवनपरिसरे उपस्थितेभ्यः सर्वेभ्यः प्राध्यापकेभ्यः, अधिकारिभ्यः, कर्मचारिभ्यः छात्रेभ्यश्च वैश्विकशान्तेः आन्तरिकशान्तेः च संरक्षणार्थं सामूहिकरूपेण शान्तिसंरक्षणस्य शपथं कारितम्। कार्यक्रमस्य शुभारम्भः महर्षिमहेशयोगिमहोदयस्य चित्रे माल्यार्पणेन वैदिकमङ्गलाचरणेन च अभवत्। अस्मिन् अवसरे मुख्यवक्ता श्रीगिरिजा-शङ्करचौधरीमहोदयः, वरिष्ठः ध्यान-सिद्धि-शिक्षकः, स्वसम्बोधने अवदत्—"महर्षिमहेशयोगिमहोदयस्य मुख्यं ध्येयमेव विश्वे पूर्णशान्तेः स्थापना आसीत्। तेन प्रतिपादितया 'भावातीतध्यान' पद्धत्या तथा योगप्रविधिभिः वयं न केवलं व्यक्तिजीवने, अपितु सम्पूर्णे समाजे राष्ट्रे च शान्तेः तरङ्गान् प्रसारयितुं शक्नुमः।"समारोहस्य मुख्यचरणे विश्वविद्यालयस्य वरिष्ठपदाधिकारिभिः सर्वेभ्यः 'शान्तिशपथः' प्रदापितः।

# भ्रष्टाचारमुक्त- विश्वविद्यालय- सङ्कल्पाय पञ्चदशसूत्रीय- विषयं पुरस्कृत्य २४ सितम्बरदिनाङ्के ल. ना. मिथिला-विश्वविद्यालयस्य प्रवेशनिरोधकार्यक्रमः



## मिथिला-छात्रसङ्घस्य उद्घोषः- आपत्कालीन- सेवा- सदृशी पारदर्शिनी परिवाद-व्यवस्था भवेत्; कुलपतिः स्वभवनात् न, अपि तु कार्यालयात् सञ्चालयेत् विश्वविद्यालयम्

**हिमसंस्कृतवार्ताः- राघव नाथ झा, दरभङ्गा।**

विश्वविद्यालयेषु भ्रष्टाचार- उन्मूलनाय, पूर्ण- पारदर्शि- प्रशासनिक- व्यवस्थानिर्माणाय च पञ्चदशसूत्रीयाणि मागधनानि (याचनाः) समुपस्थाप्य 'मिथिला-छात्रसङ्घेन' आगामिनि २४ सितम्बरदिनाङ्के ललितनारायण- मिथिला- विश्वविद्यालयस्य प्रशासनिकभवनस्य समग्र- प्रवेशनिरोध- कार्यक्रमः विधास्यते। आन्दोलनस्य पूर्वसज्जासन्दर्भे मङ्गलवासरे विश्वविद्यालयस्य प्रतिवादस्थले छात्रसङ्घस्य पक्षतः एका पत्रकारसङ्गोष्ठी समायोजिता। अस्यां सङ्गोष्ठ्यां विश्वविद्यालये सम्बद्ध-महाविद्यालयेषु च प्रसरिता कथित-कुव्यवस्था, अनियन्त्रिता अनियमितता, छात्रसमस्याश्च अत्यन्त-प्रखरतया समुद्घाटिताः।

सङ्घस्य राष्ट्रियाध्यक्षेण विद्याभूषणेन प्रतिपादितं यत्- "अयं विश्वविद्यालयः लक्षशः छात्र-छात्राणां भविष्य-निर्माणस्य पावनं केन्द्रम् अस्ति। अतः प्रशासनिकव्यवहारेषु सर्वथा सत्यनिष्ठा, पारदर्शकता, उत्तरदायित्व-भावना च अपेक्षिता।" सः आरोपम् अकरोत् यत् व्यावहारिक- प्रशिक्षण- पत्र- वितरणस्य (कार्यशिक्षणावधेः अनुभव- प्रमाणपत्रस्य) व्याजेन छात्रेभ्यः कोटिशः रूप्यकाणां यत् अनुचित-सङ्ग्रहणं क्रियते, तस्य उच्चस्तरीयम् अनुसन्धानं निष्पक्ष-परीक्षणं च परमावश्यकम्। सः स्पष्टतया न्यवेदयत् यत्- "कुलपतिः निज- आवासात् विश्वविद्यालय-सञ्चालनस्य परम्परां परित्यज्य, प्रशासनिककार्यालये समुपस्थाय विधिवत् कार्य-सम्पादनं कुर्यात्।"

छात्रसङ्घेन शासनादेश-सञ्चालितायाः '११२' इत्याख्यायाः त्वरित- आपत्कालीन- व्यवस्थायाः प्रारूपम् अनुसृत्य एका सुदृढा 'अन्तर्जाल- परिवाद- निवारण- प्रणाली' समुपस्थापनीया इति दृढतया निवेदितम्। सङ्घानुसारं परिवादे पञ्जीकृते सति तदवसर एव परिवादकर्त्रे एकः विशिष्ट- सङ्ख्याङ्कः प्रदेयः स्यात्। यावत्पर्यन्तं सम्यक् अन्वेषणं दोष- निवारणं च न विधीयते, तावत् परिवादः 'असमाहितः' (अनिस्तारितः) इति मन्येत; तथैव च द्विसप्तति-होराभ्यन्तरे (७२ घण्टानां मध्ये) सर्वमपि प्रगति-विवरणं छात्राय दातव्यम्। सन्तुष्टिजनके समाधाने जाते एव परिवादः 'समाहितः' इति उद्घोष्य विरामं लभेत। सङ्घेन छात्र-सङ्घनिर्वाचनस्य अविलम्बम् आयोजनम्, ललितनारायण- मिथिला- विश्वविद्यालयाय केन्द्रीय-विश्वविद्यालय-पदव्याः (गौरवस्य) याचना, विधिशास्त्र-संकाये आसनानां वृद्धिः, दूरस्थ-शिक्षा-प्रकल्पस्य पुनरारम्भः, तथा च विश्वविद्यालये महाविद्यालयेषु च नाम-पट्टिकानां मिथिलाक्षरे (तिरहुता-लिपौ) अङ्कनं कारणीयम् इति महती याचना समुपस्थापिता। विश्वविद्यालयपरिसरः मध्यस्थप्रवृत्तितः सर्वथा विमुक्तः स्यात्, दीर्घकालात् पिहिताः छात्रावासाश्च अविलम्बं छात्रेभ्यः पुनरुद्घाटिताः भवेयुः इत्यपि स्पष्टीकृतम्।

अन्येषां विषयाणां विषये सङ्घेन ई-ग्रन्थागारस्य, अङ्कीय-फलकस्य, आभासीय-कक्षायाः, अन्तर्जालसुविधायाः, मेधाविकक्षाणां च परिपूर्णव्यवस्था, रिक्तानां शैक्षणिक- अशैक्षणिक- पदानां शीघ्रपूरणं, सर्वकारीय- सम्बद्ध- महाविद्यालयानां शिक्षणशुल्केषु एकरूपता च दृढस्वरेण याचिता। स्नातकोत्तरप्रवेशाय प्रवेशपरीक्षायाः अनिवार्यता, विषयपरिवर्तनस्य सुगमः अवसरः, सत्रनियमनं, परीक्षाफलानां समयोचिता घोषणा, दैनन्दिन-कक्षा-सञ्चालनं च अस्यां पञ्चदशसूत्रीय-याचनावलौ प्रमुखतया समाविष्टानि। अपि च, एम. एल. एस. सरिसब- महाविद्यालये वाणिज्य- संकायस्य पठन-पाठनं शीघ्रं प्रारभ्यताम्। इति सर्वेषु महाविद्यालयेषु छात्रेभ्यः छात्राभ्यश्च पृथक्-पृथक् विश्रामप्रकोष्ठस्य सुव्यवस्था विधातव्या। जे. के. महाविद्यालय- बिरौल इत्यत्र अयम् अभावः अविलम्बं दूरीक्रियताम् इति प्रतिपादितम्।

सङ्घेन निष्कर्षतः उद्घोषितं यत् २४ सितम्बरदिनाङ्के प्रवर्तिष्यमाणः अयं प्रवेशनिरोध-सङ्ग्रामः न केवलं प्रतिवादः, अपि तु छात्रकल्याणाय, शैक्षिकमर्यादायाः रक्षणाय, प्रशासनिक-शुचितायाः प्रतिष्ठापनाय च निर्णायकः शङ्खनादः भविष्यति।

अस्यां पत्रकारसङ्गोष्ठ्यां उदयनारायणः, विश्वविद्यालय- सङ्घप्रमुखः गौतमझा, वरिष्ठ- छात्रनेतारौ अमनसक्सेना, रचनाझा, विश्वविद्यालय- सङ्घटनमन्त्री आशिषदेवः, मण्डल-सङ्घटनमन्त्री नारायणमिश्रः, मो. सेराजः, गोपालभगतः, सत्यम्, पिण्टू, गोपालठाकुरः इत्यादयः बहवः छात्रनेतारः कार्यकर्तारश्च महता उत्साहेन समुपस्थिताः आसन्।

# सार-विक्रेतृ-प्रतिनिधिभिः सह मन्त्रणा; आपूर्ति- व्यवस्थायाः सूक्ष्मानुशीलनं विधायाऽऽपण - पर्यन्त- वहनविधानेन समये एव विक्रयकेन्द्रेषु रासायनिक-सार-प्रापणाय मन्त्रिणः कठोरनिर्देशः



***"कृषीवलानां हितेन सहैव स्थूल- सूक्ष्म- विक्रेतॄणां क्षेमरक्षणाय अपि शासनं पूर्णतया बद्धपरिकरम् अस्ति।"- श्रीविजयकुमारसिंहः, कृषि-मन्त्री***

हिमसंस्कृतवार्ताः- राघवनाथ झा, पाटलिपुत्रम्।

राज्ये कृषीवलेभ्यः (कृषकेभ्यः) रासायनिक-सारस्य निर्बाधाम्, ऋतुकूलामू, न्याय्य-मूल्येन च लभ्यतां दृढीकर्तुं बिहारशासने कृषिमन्त्रिणः विजयकुमारसिंहस्य आध्यक्ष्ये कृषि-निदेशकस्य, सार-निर्माणक-संस्थानां, सार-विक्रेतृ-प्रतिनिधीनां महती उपवेशना समनुष्ठिता। अस्यां मन्त्रणायां निर्माणक-संस्थाभ्यः विक्रयकेन्द्रं यावत् सारवहनस्य, राज्ये प्रचुरसञ्चयस्य, कृषकेभ्यः आवश्यक्तानुगुणं वितरण-शृङ्खलायाश्च सर्वाङ्गीणम् अनुशीलनं विहितम्।

कृषि-मन्त्रिणा स्फुटम् उद्घोषितं यत् कृषक-क्षेमं शासनस्य परमा प्राथमिकता वर्तते। सारस्य प्रदाय- शृङ्खलायां कस्यापि स्तरस्य शैथिल्यम्, अनियन्त्रिता अनियमितता वा सर्वथा असह्या भविष्यति। मन्त्रिणा प्रतिपादितं यत् सारवितरणे निर्माणकसंस्थानां, स्थूलविक्रेतॄणां, सूक्ष्मविक्रेतॄणां च महनीयं दायित्वं वर्तते; अतः नियमानुकूलं कर्म कुर्वतां सर्वेषामपि विक्रेतॄणां हितानि शासन-पक्षतः पूर्णतया सुरक्षितानि स्थास्यन्ति। मन्त्रिणा निर्माणक- संस्थाभ्यः दृढ-निदेशः प्रदत्तः यत् सर्वाः अपि संस्थाः गन्तव्यपर्यन्त- वहन- नियमेन) विक्रयकेन्द्रेभ्यः सार-प्रापणस्य स्वीयं दायित्वं प्रमाद-रहितं निर्वहेयुः। यदि काचित् संस्था अस्मिन् कर्मणि शैथिल्यं प्रदर्शयेत् अथवा विक्रेतृभ्यः काऽपि बाधा समापतेत्, तर्हि सम्बन्धिनः विक्रेतारः साक्षात् कृषिमन्त्रिणं वा विभागस्य प्रधान-सचिवं वा ज्ञापयितुं शक्नुवन्ति। प्राप्तपरिवादानां निष्पक्ष- परीक्षणानन्तरं दोषसिद्धौ सत्यां दोषिसंस्थानां विरुद्धं कठोरविधि-कार्याचरणं, बिहार-राज्ये तासां व्यापार-प्रतिबन्धः चापि विधास्यते। तथैव, राज्ये सार-वितरण-व्यवस्थायाः सुदृढीकरणाय जनपद- स्तरात् राज्य-स्तरं यावत् सर्वकारेण निरन्तरम् अनुश्रवणं विधीयते। मन्त्रिणा सर्वेषां जनपदानां जनपद-कृषि-पदाधिकारिणः समादिष्टाः यत् स्व- स्वजनपदेषु आपूर्तिवितरणयोः कस्यापि वैषम्यस्य वार्ता प्राप्यते चेत्, अविलम्बं मण्डलायुक्तं संसूच्य कृषीवलेभ्यः निर्धारित-मूल्ये सार-वितरणं सुनिश्चयेयुः।

# छठ-महापर्वस्य लोककलाभिः मण्डयिष्यते नवदेहली; यूनेस्कोसंस्थायाः अमूर्त- सांस्कृतिक- सम्पत्-सूच्याम् अन्तर्भावयितुं श्लाघ्यः प्रयासः



## २८ सितम्बर-दिनाङ्कतः १ अक्टूबर-दिनाङ्कं यावत् 'इण्टैक' मुख्यालये 'अर्घ्य' इत्याख्या कलाप्रदर्शनी; बिहार-प्रान्तस्य पञ्चत्रिंशदधिकाः लोक-शिल्पिनः भविष्यन्ति सम्मिलिताः

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्

छठ-महापर्वणः पौराणिकीं सांस्कृतिकपरम्पराम्, अकृत्रिमाः लोककलाः, प्रत्यक्ष- देव- भास्कर- उपासनायाश्च विविधान् पक्षान् राष्ट्रियराजधान्यां प्रदर्शयितुं 'अर्घ्य' इत्याख्यायाः विशिष्ट- कला- प्रदर्शिन्याः आयोजनं विधीयते। 'भारतीय- सांस्कृतिकनिधि' (इण्टैक) इत्यनया संस्थया आयोज्यमाना इयं प्रदर्शनी आगामिनि २८ सितम्बरदिनाङ्कतः १ अक्टूबरदिनाङ्कं यावत् नवदेहल्याः इण्टैक-मुख्यालये सम्पत्स्यते। अस्य आयोजनस्य मुख्यम् उद्देश्यं छठ-महापर्वणः समृद्ध-सांस्कृतिकधरोहरं वैश्विकपटले प्रतिष्ठाप्य, यूनेस्को संस्थायाः प्रतिष्ठित- 'अमूर्त- सांस्कृतिक- सम्पत्सूचौ' तस्याः समावेशाय क्रियमाणान् प्रयत्नान् समुत्तेजयितुम् अस्ति। 'इण्टैक- बिहार'-विभागस्य संयोजकेन भैरवलालदासेन ज्ञापितं यत्- अस्याः 'अर्घ्य' इत्याख्यायाः प्रदर्शिन्याः समुद्घाटनं २८ सितम्बरदिनाङ्के प्रातः एकादशवादने राज्यसभायाः उपसभापतिना हरिवंशेन विधास्यते। अस्मिन् समारम्भे इण्टैक-संस्थायाः अध्यक्षाः अशोकसिंहठाकुराः, सदस्यसचिवाः रवीन्द्रसिंहाः (भा. प्र. से.), हस्तशिल्पप्रभागस्य प्रमुखा बिन्दुवन्दनामन्चन्दा च गरिमामय-उपस्थित्या कार्यक्रमं शोभयिष्यन्ति।

### छठपर्वणः ऐतिहासिकता-विषये विदुषां सङ्गोष्ठी

प्रदर्शनी-दिनेषु एव ३० सितम्बरदिनाङ्के अपराह्ने द्विवादन-समये छठपर्वणः ऐतिहासिकताम्, शास्त्रीयरहस्यं च अधिकृत्य एका गम्भीरा विद्वत्सङ्गोष्ठी समायोजिष्यते। अस्यां सङ्गोष्ठ्यां कैला सुकुमारमिश्रः, दक्षिण-एशिया-विश्वविद्यालयस्य प्राध्यापकः देवनाथपाठकः, पर्यावरणविद् दरभङ्गायाः प्राध्यापकः विद्यानाथझा, देहली-विश्वविद्यालयस्य प्राध्यापकः राधामधवभारद्वाजः, रिपुञ्जयठाकुरः, पाटलिपुत्रस्य च डॉ. मनोजकुमार अम्बष्ठः इत्यादयः शीर्षस्थाः विद्वांसः समाहूताः सन्ति। 'इण्टैक-बिहार' विभागस्य सह-संयोजकेन डॉ. शिवकुमारमिश्रेण विज्ञापितं यत्- अस्यां प्रदर्शिन्यां बिहारप्रदेशस्य पञ्चत्रिंशदधिकेभ्यः (३५+) पारम्परिक- लोक- कलाकारेभ्यः स्थानं प्रदत्तम् अस्ति। एते सर्वेऽपि शिल्पिनः छठपर्वणा, सूर्यनारायण- उपासनया च सम्बद्धाः स्वनिर्मिताः उत्कृष्टाः कलाकृतीः प्रदर्शयिष्यन्ति। एतासां कलाकृतीनां माध्यमेन छठ-सम्बद्धाः प्रतीकाः, लोकविश्वासाः, आचाराश्च प्रातिभदृष्ट्या प्रकटीकरिष्यन्ते।

### मिथिला-चित्रकलातः आरभ्य मञ्जूषा- सिकी- शिल्पं यावत् प्रकटीभविष्यति बिहारस्य वैविध्यम्

प्रदर्शिन्याः संरक्षिकाभ्यां (क्यूरेटर) मिथिला-चित्रकला- शिल्पिन्या मनीषाझामहोदयया, अलकादास- महोदयया च स्पष्टीकृतं यत्- 'अर्घ्य' आयोजने केवलं सज्जीकृतानां चित्राणाम् उपस्थापनं न भविष्यति, अपि तु दर्शकाः कलाकाराणां निर्माणप्रक्रियां प्रत्यक्षं द्रष्टुं, समाज-संस्कृति- परम्पराभिः सह कलायाः आन्तरिकं सम्बन्धं सूक्ष्मतया अवगन्तुं च अवसरं लप्स्यन्ते। अस्यां प्रदर्शिन्यां मिथिला-चित्रकला (मधुबनी), पाटलिपुत्र-कलम (पटना-कलम), मञ्जूषा-कला, भोजपुरी-लोककला, सिकी-शिल्पं, कुट्टिमृत्तिका-शिल्पं (पेपरमेशी), पक्वमृत्तिकाशिल्पं (टेराकोटा), सुजनी-शिल्पं, वैद्यनाथकला चेति विविधाः लोकविधाः समाविष्टाः सन्ति। आयोजकमते, 'अर्घ्य' न केवलम् एका सामान्यप्रदर्शनी, अपि तु लोकजीवनस्य, आस्थायाः, कलात्मकचेतनायाश्च पावनः सङ्गमः वर्तते। अस्य माध्यमेन इदमपि प्रतिपादयिष्यते यत् छठपरम्परा केवलम् अतीतस्य स्मृतिः नास्ति, अपि तु अद्यापि समाजैः जीवन्ततया आचर्यमाणा, संवर्ध्यमाना, भावि-पीढिं प्रति सङ्क्रम्यमाणा च अस्ति।अस्यां प्रदर्शिन्यां देशविश्रुताः कलाकाराः- अर्चनासिन्हा, मृणालसिंहः, मनुमीनाक्षी, साधनादेवी, मिङ्कीदासः, सविताकुमारी, प्रो. दिनेशकुमारः, तृप्तिरानी, सञ्जुदासः, निभालूभः, ममता भारती, सन्तोष कुमारः, रामूकुमारः, जितेन्द्र मोहनः, अर्चना चौधरी, विनीता, प्रतीकप्रभाकरः, ज्ञानती देवी, चारूवर्मा, सोमा आनन्दः, मनोज चौधरी, सञ्जयकुमार जायसवालः, अर्चना कुमारी, कञ्चनः, नूतनलाभः, अमृताशाम्भवी, अन्नुझा इत्यादयः स्वकीयाभिः अनुपमाभिः कलाकृतिभिः मण्डपं सुशोभयिष्यन्ति।

### प्रातः सार्ध-दशवादनात् सायम् षड्वादनं यावत् दर्शकानां कृते उद्घाटितः भविष्यति मण्डपः

इयं विशिष्ट 'अर्घ्य' प्रदर्शनी नवदेहल्यां लोधी-सम्पदा- स्थिते, के. के. बिड़लामार्ग-समीपस्थे 'इण्टैक' मुख्यालये प्रतिदिनं प्रातः सार्धदशवादनात् (१०:३०) सायम् षड्वादनं (६:००) यावत् दर्शकानां अवलोकनार्थं मुक्ता स्थास्यति। अत्र सर्वेषां कला-अनुरागिणां कृते प्रवेशः सर्वथा निःशुल्कः वर्तते।

## संस्कृत-हिन्दीभाषयोः सांस्कृतिकयोगदानविषये विद्वद्व्याख्यानम्

हिमसंस्कृतवार्ताः — उत्तरप्रदेशसंस्करणम्

नवदेहली, २२ सितम्बर २०२६। संस्कृत-संस्कृति-विकास-संस्थान-न्यासस्य दिल्ली-प्रान्तस्य तत्त्वावधाने हिन्दीमासमहोत्सव-२०२६ अन्तर्गतं 'संस्कृत और हिन्दी भाषा का योगदान—संस्कृति के संदर्भ में' इति विषये आभासीयं विद्वद्व्याख्यानम् आयोजितम्।कार्यक्रमस्य शुभारम्भः वैदिकेन लौकिकेन च मङ्गलाचरणेन अभवत्। ततः प्रो. विजयः अतिथीनां स्वागतं कृतवान्। प्रो. अञ्जुसेठेन संस्थानस्य परिचयः प्रस्तुतः।मुख्यवक्त्री प्रो. साधनाशर्मा, पूर्वप्राचार्या, श्यामाप्रसादमुखर्जीमहाविद्यालयः, दिल्लीविश्वविद्यालयः, संस्कृतहिन्दीभाषयोः साहित्यिकं सांस्कृतिकं ज्ञानपरकं च योगदानं विषयीकृत्य स्वकीयविचारान् प्रस्तुतवती। मुख्यातिथिः प्रो. गिरीश्वरः, पूर्वकुलपतिः, महात्मागान्धी-अन्तरराष्ट्रीय-हिन्दीविश्वविद्यालयः, वर्धा, विषयस्य विविधान् सांस्कृतिकान् आयामान् प्रकाशयन् भाषितवान्।
कार्यक्रमस्य अध्यक्षता प्रो. प्रमोदेन, विद्वत्परिषदः प्रमुखेन, संस्कृत-संस्कृति-विकास-संस्थानस्य दिल्लीप्रान्तेन, कृता। अध्यक्षीयसम्बोधने तेन भाषा-साहित्य-संस्कृत्योः परस्परसंबन्धं रेखाङ्कितम् तथा सांस्कृतिकविकासे तेषां भूमिकायाः महत्त्वं प्रतिपादितम्।कार्यक्रमस्य सञ्चालनं सुश्री अनामिकासिंहेन कृतम्। डॉ. नीतावर्मणा धन्यवादज्ञापनं प्रस्तुतम्। शान्तिपाठेन कार्यक्रमस्य समापनम् अभवत्।कार्यक्रमस्य आयोजनाय संयोजकः डॉ. कृष्णकुमारभार्गवः, समन्वयिका डॉ. गीतादुबे तथा संस्थानस्य अन्ये पदाधिकारिणः महत्त्वपूर्णं सहयोगं प्रदत्तवन्तः। प्रतिवेदनलेखनं सुश्री अनामिकासिंहेन कृतम्।





# श्रीसीताराम- वैदिकादर्श- संस्कृत- महाविद्यालये द्विशताधिक- हस्तलिखितग्रन्थानां समर्पणम्

**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः, कोलकाता, २२ सितम्बर २०२६।** कोलकातास्थिते श्रीसीताराम- वैदिकादर्श- संस्कृत- महाविद्यालये बहुमूल्य- हस्तलिखित- ग्रन्थानां समर्पण-स्वीकारसमारोहः सम्पन्नः। अयं समारोहः भारतीयज्ञानपरम्परायाः, संस्कृतवाङ्मयस्य च संरक्षणे महत्त्वपूर्णं सोपानम् अभवत्।

हुगली-मण्डलस्य पोल्वा-दादपुर-खण्डान्तर्गते सिङ्गुर- प्रदेशवास्तव्यः प्रभातबन्द्योपाध्यायमहोदयः स्वकीयसंग्रहे दीर्घकालं संरक्षितान् द्विशताधिकान् संस्कृतहस्तलिखितग्रन्थान् अनुसन्धान- शैक्षणिक- प्रयोजनार्थं श्रीसीताराम- वैदिकादर्श- संस्कृत- महाविद्यालयाय समर्पितवान्। अस्मिन् समारोहे महाविद्यालयस्य अध्यक्षः प्रो. एस. सुब्रह्मण्यशर्मामहोदयः, प्राचार्यः डॉ. सोमेशकुमार- मिश्रमहोदयः च उपस्थितौ आस्ताम्। हस्तलिखितग्रन्थ-अध्ययन-संरक्षणयोः विशेषज्ञः डॉ. विवेकानन्दबन्द्योपाध्यायमहोदयः अपि समारोहे उपस्थितः आसीत्। तस्य महत्त्वपूर्णप्रयत्नेन एतेषां हस्तलिखितग्रन्थानां महाविद्यालयाय समर्पणस्य व्यवस्था सम्पन्ना। बन्द्योपाध्याय-कुलस्य ऐतिहासिक- सांस्कृतिक- परम्परायाः सन्दर्भे अयं समर्पणकार्यक्रमः विशेषमहत्त्वं वहति। बंगालस्य पारम्परिक- कुलवृत्तान्तेषु कान्यकुब्जदेशीयानां पञ्च ब्राह्मणानां गौडदेशे आगमनस्य परम्परा प्रसिद्धा अस्ति। तेषु भट्टनारायणः शाण्डिल्यगोत्रीयः इति परम्परया प्रसिद्धः, संस्कृतनाट्यग्रन्थस्य 'वेणीसंहारस्य' कर्ता इति विद्वत्परम्परायां स्वीक्रियते। विभिन्नेषु कुलवृत्तान्तेषु पञ्चब्राह्मणानां नामानि, विवरणानि च किञ्चित् भिन्नरूपेण प्राप्यन्ते।

## एकस्मिन् प्रसिद्धे पारम्परिकविवरणे पञ्च ब्राह्मणाः एवं निर्दिष्टाः-

**1. भट्टनारायणः- शाण्डिल्यगोत्रीयः, वेणीसंहारस्य कर्ता**
**2. दक्षः- काश्यपगोत्रीयः**
**3. श्रीहर्षः- भारद्वाजगोत्रीयः**
**4. वेदगर्भः- सावर्णगोत्रीयः**
**5.छान्द्र/छान्दड-ब्राह्मणः- वात्स्यगोत्रीयः**

समर्पिताः हस्तलिखितग्रन्थाः संस्कृतभाषा- साहित्य- दर्शन- वेद- वेदाङ्ग- परम्परागत- ज्ञानविज्ञानादीनां विविधक्षेत्राणाम् अनुसन्धानाय अत्यन्तं महत्त्वपूर्णाः भविष्यन्ति। हस्तलिखितग्रन्थाः केवलं पुरातनलेखाः न, अपितु भारतीयज्ञानपरम्परायाः प्राथमिकाः ज्ञानस्रोतांसि सन्ति। महाविद्यालयपक्षतः एतेषां ग्रन्थानां संरक्षणं, सूचीकरणं, वैज्ञानिकरीत्या सम्पादनम्, अङ्कीकरणं, अनुसन्धानकार्येषु उपयोगः भविष्यति। एतेषां ग्रन्थानां संरक्षणेन शोधच्छात्राणां, अध्यापकानाम्, अन्येषां विदुषां कृते नूतनाः अनुसन्धान- सम्भावनाः उद्घाटिताः भविष्यन्ति। महाविद्यालयः प्रभातबन्द्योपाध्याय-महोदयस्य प्रति हार्दिकां कृतज्ञतां व्यक्तयति, यत् तेन स्वकीयसंग्रहे सुरक्षितां बहुमूल्यां हस्तलिखितग्रन्थसम्पदं अनुसन्धानपरायणाय शैक्षणिकसंस्थायै समर्पिता। डॉ. विवेकानन्दबन्द्योपाध्यायमहोदयस्य प्रयासोऽपि विशेषतया प्रशंसनीयः अस्ति। अयं समारोहः न केवलं हस्तलिखितग्रन्थानां समर्पणस्य कार्यक्रमः, अपि तु भारतीय- ज्ञान- परम्परायाः संरक्षणस्य, संस्कृतानुसन्धानस्य संवर्धनस्य, भाविपीढीनां कृते अमूल्यज्ञानसम्पदः रक्षणस्य महत्त्वपूर्णः प्रयासः इति मन्यते।

# उत्तरप्रदेशे स्नातक-शिक्षक विधानपरिषद् निर्वाचनस्य कार्यक्रमः

**आयोगेन उत्तरप्रदेशे स्नातक-शिक्षक विधानपरिषद् निर्वाचनस्य कार्यक्रमः घोषितः**

लखनऊ। भारतनिर्वाचनायोगेन उत्तरप्रदेशे विधानपरिषदः स्नातक- शिक्षकनिर्वाचनक्षेत्राणां द्विवार्षिकनिर्वाचनस्य कार्यक्रमः घोषितः। आयोगेन २२ सितम्बर- दिनाङ्के निर्गते प्रेस-विज्ञप्तेः अनुसारं उक्तनिर्वाचनक्षेत्रेषु २३ अक्तूबर २०२६ दिनाङ्के मतदानं भविष्यति। २७ अक्तूबर दिनाङ्के मतगणना आयोजयिष्यते। आयोगस्य निर्वाचनकार्यक्रमानुसारं २९ सितम्बर दिनाङ्के निर्वाचनस्य अधिसूचना निर्गमिष्यते। नामनिर्देशनपत्रं समर्पयितुं अन्तिमतिथिः ६ अक्तूबर निश्चितीकृता अस्ति। नामनिर्देशनपत्राणां परीक्षणं ७ अक्तूबर दिनाङ्के भविष्यति। अभ्यर्थिनः ९ अक्तूबर दिनाङ्कपर्यन्तं स्वनामनिर्देशनपत्रं प्रत्याहर्तुं शक्नुवन्ति। निर्वाचनायोगस्य अनुसारं २३ अक्तूबर दिनाङ्के प्रातः ८ वादनतः सायं ४ वादनपर्यन्तं मतदानं भविष्यति। ततः २७ अक्तूबर दिनाङ्के मतगणना करिष्यते। निर्वाचनस्य सम्पूर्णा प्रक्रिया ३१ अक्तूबर २०२६ दिनाङ्कपर्यन्तं पूर्णा करिष्यते।

वस्तुतः उत्तरप्रदेशस्य लखनऊ, वाराणसी, आगरा, मेरठ तथा इलाहाबाद-झाँसी स्नातकनिर्वाचनक्षेत्राणां तथा लखनऊ, वाराणसी, आगरा, मेरठ, बरेली-मुरादाबाद तथा गोरखपुर-फैजाबाद शिक्षकनिर्वाचनक्षेत्राणां सदस्याणां कार्यकालः समाप्तिं गमिष्यति। अतः एतेषां स्थानानां कृते निर्वाचनस्य घोषणा कृता अस्ति। निर्वाचनकार्यक्रमस्य घोषणया सह सम्बद्धेषु निर्वाचनक्षेत्रेषु आदर्श- आचारसंहिता तत्कालप्रभावेन प्रवृत्ता अस्ति।

निर्वाचनस्य प्रमुखाः तिथयः
निर्वाचनस्य अधिसूचना — २९ सितम्बर
नामनिर्देशनस्य अन्तिमतिथिः — ६ अक्तूबर
नामनिर्देशनपत्राणां परीक्षणम् — ७ अक्तूबर
नामप्रत्याहरणस्य अन्तिमतिथिः — ९ अक्तूबर
मतदानम् — २३ अक्तूबर
मतदानस्य समयः — प्रातः ८ वादनतः सायं ४ वादनपर्यन्तम्
मतगणना — २७ अक्तूबर
निर्वाचनप्रक्रियायाः सम्पूर्णतायाः अन्तिमतिथिः — ३१ अक्तूबर २०२६

# अनावृष्टि-प्रभावित-कृषकेभ्यः सद्यः एव वित्तीया साहाय्यता प्रदास्यते: मुख्यमन्त्री देवेन्द्र-फडणवीसः



महाराष्ट्रस्य मुख्यमन्त्रिणा देवेन्द्र-फडणवीसेन उक्तं यत् राज्यसर्वकारः केन्द्रसर्वकारस्य वित्तीयायाः साहाय्यतायाः प्रतीक्षां विना एव अनावृष्टि-सदृश-स्थित्या पीडितेभ्यः कृषकेभ्यः सद्यः साहाय्यं प्रदास्यति। मुम्बय्यां मन्त्रिमण्डलस्य उपवेशनानन्तरं पत्रकारैः सह सम्भाषणे श्रीफडणवीसमहोदयेन उक्तं यत् अनावृष्टेः उपशमनेन सम्बद्धा प्रारम्भिकी अधिसूचना शनिवासरपर्यन्तं प्रसारिता भवेदिति सम्भावना वर्तते। सः न्यवेदयत् यत् शस्य-विनाशस्य मूल्याङ्कनाय श्वः आरभ्य पञ्चनामा-प्रक्रिया प्रारप्स्यते। सः अकथयत् यत् सोयाबीन- मक्का-कार्पास-शस्यानां सर्वाधिकं नुकसानं जातम्। अपरञ्च कोङ्कण-क्षेत्रे धान्य-कृषिः अपि प्रभाविता अभवत्। मुख्यमन्त्रिणा उपशम-उपायेषु द्रुत-निर्णयान् स्वीकर्तुं राजस्वमन्त्रिणः चन्द्रशेखर- बावनकुले-महोदयस्य अध्यक्षतायां मन्त्रिमण्डलीय-उपसमितेः सङ्घटनस्य घोषणा कृता। अस्यै समितये मन्त्रिमण्डलस्य अधिकाराः प्रदत्ताः, मुख्यसचिवः राजेश-अग्रवालः च अस्याः सदस्य-सचिवः भविष्यति। श्रीफडणवीसमहोदयेन उक्तं यत् श्वः आरभ्य मन्त्रिणः जनप्रतिनिधयश्च प्रभावितानां क्षेत्राणां प्रवासं कृत्वा स्थितेः निरीक्षणं करिष्यन्ति कृषकैः सह च सम्भाषणं विधास्यन्ति। सः सूचितवान् यत् राज्यसर्वकारः राष्ट्रियापदा-प्रतिक्रिया-कोषस्य (NDRF) नियमानाम् अन्तर्गतं केन्द्रसर्वकारात् वित्तीयार्थ-साहाय्याय पृथक्तया प्रस्तावं सज्जीकरिष्यति।



# "संस्कृतकथामञ्जरी" {२२}
## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।
## "अथ कन्यातुलितसुवर्णदानं नाम षोडशोपाख्यानम्"(१)

सिंहासनमस्मदायत्तं कथमबलाप्रतिषेधान्नोपवेष्टव्यम्? इति विचार्य्य सिंहासनमधिरोढुकामे राज्ञि तं निवार्य्य पुनरन्या पुत्तलिकाऽब्रवीत्- श्रृणु राजन्! विक्रमार्को राजा दिग्विजयार्थं निर्गत्य पूर्व- दक्षिण-पश्चिमोत्तरदिश; विदिशश्च परिभ्रम्य, तत्रत्यान् नृपतीन् पादतलावनतान् विधाय तै समर्पितमन्यैरखादितं वस्तुजातं गृहीत्वा पुनस्तान् स्वपदे संस्थाप्य निजनगरं प्रति समायातः। अथ नगरप्रवेशसमये केनचित् दैवज्ञेनोक्तं- भो देव! दिनचतुष्टयं नगरप्रवेशे मुहूर्तः नास्ति। तस्य तद्वचनं श्रुत्वा राजा ग्रामाद्बहिः उपवने पटमण्डपान् कारयित्वा, तत्रैव दिनचतुष्टयं नेतुमुपक्रान्तवान् तस्मिन् समये ऋतुराजो वसन्तः समागतः। अथ वसन्तविलासं दृष्ट्वा सुमन्त्रः मन्त्री राजसमीपमागत्योक्तवान्- भो राजन्! ऋतुराजो वसन्तः समायतः, अद्य वसन्तपूजा कर्तव्या। तस्मिन् पूजिते सर्वेऽपि देवाः त्वयि प्रसन्ना भविष्यन्ति, सर्वेऽपि लोकः सुखी भविष्यन्ति, सर्वस्याप्यरिष्टस्य शान्तिः भविष्यति। तस्य मन्त्रिणाः तद्वचनं श्रुत्वा राजा तथास्तु इत्यङ्गीकृत्य वसन्तपूजा सम्पादने तमेव समादिदेश। तदन्तरं स मन्त्री सुमनोहरं सभामण्डपं कारयित्वा, वेदशास्त्रसम्पन्नान् ब्राह्मणान्, गीतवाद्याभिज्ञान् भरतान् इतरकलाकुशलाः नर्तकीश्च समाह्वयत्; दीनान्ध- बधिर- पङ्गु- कुब्जादयन्तु स्वयमेवागताः। तत्र सभामण्डपे तेन नवरत्नखचितं सिंहासनं संस्थाप्य तत्र लक्ष्मीनारायणप्रतिमाद्वयं प्रतिष्ठापितम्। पूजार्थं कुङ्कुम- कर्पूर- वास्तुरिकां- चन्दनागुरुप्रभृतीनि सुगन्धिद्रव्याणि- पुष्पाणि, जाती- यूथिका- मल्लिका- कुन्द- शतपत्र- मदन- चम्पक- केतकीप्रभृतीनि च समानीतानि। एवं यथाविधानं राजा स्वयं लक्ष्मीनारायणो स्नपनादि-षोडशोपचारैः पूजयित्वा, ब्राह्मणादीन् कलाकुशलजनान् वस्त्रादिना सम्भावितवान्। तदन्तरं गायकाः वसन्तरागालापं कृत्वा वसन्तं जगुः। ततो राजा तेषां वीटिकां ददौ। अत्रान्तरे कश्चितब्राह्मणः सकन्यकः समागत्य चावदत्- भो राजन्! विज्ञप्तिरेकाऽस्ति। राज्ञोक्तं- निवेदय। ब्राह्मणेनोक्तम्- अहं नन्दिवर्धननगरवासी ब्राह्मणः। ममाष्टो पुत्रा एव जाताः, परं नैकाऽपि दुहिता सम्भूता। ततः अतिदुःखितेन सभार्येण मया जगदम्बिकायाः पुरतः एवं सङ्कल्पः कृतः, यत्- मातः अम्बिके! मम कन्या यदि भविष्यति, तदा तां तव नाम धारयिष्यामि। अन्यच्- तत्कन्यया तुलितं सुवर्णं तुभ्य दास्यामि, कन्याच्च तां कस्मैचित् वैदिकवराय वराय सम्प्रदास्यामि इति। कालेन जगदम्बिकाप्रसादात् मम इयं सुलक्षणा दुहिता समजायत। इदानीम् अस्या विवाहकालः समायतः; सम्प्रति च अस्याः एकादशस्थाने गुरुर्वर्त्तते इति कथमपि अयं कालोनोपेक्षणीयः इति सम्प्रत्येव त्वस्या विवाहं दातुसुदृयुक्तः। अतोऽहं पूर्व्वप्रतिश्रुतं कन्यया तुलितं सुवर्णं देव्यै दातुम् इच्छामि। अन्यः काश्चित् विक्रमं विना राजा भूमण्डले नास्ति, यः एतत् कन्यातुलितं सुवर्णं दातुं प्रभवति इति त्वदन्तिकं समागतोऽस्मि।

डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम



हिमसंस्कृतवार्ताः, ईदरधीररजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य एका विचित्रा वार्ता मया श्रुता। निज-जन्मदिने एका महिला सङ्कीर्णे गर्ते पतिता। सा तत्र अवरुद्धा, पश्चात् रक्षकैः उद्धृता च।

**काव्या-** अहो कष्टम्! तस्याः जन्मदिने एव महद् दुःखं प्राप्तम्। अन्या अपि वार्ता मया पठिता। क्यालिफोर्निया-प्रान्ते शासकेन 'निम्बूक-पिष्टकम्' इति नामकः विधिः प्रत्याख्यातः। अन्वेषणेषु चौर्यकर्तृभ्यः आरक्षकेभ्यः दण्डं दातुं सः विधिः रचितः।

**नन्दिनी-** चित्रम्! आरक्षकाः एव चौर्यकर्तारः जाताः इति महद् आश्चर्यम्। मया अन्या वार्ता दृष्टा। महाराष्ट्रराज्ये पराग-महोदयेन 'महादेवमण्डलम्' इति नामकं नूतनं वाद्यं निर्मितम्। शङ्करबाबा-नामकस्य योगिनः उपवेशन-मुद्रया तस्य वाद्यस्य रूपं प्रेरितम्।

**काव्या-** अहो, योगिनः मुद्रया वाद्यं निर्मितम् इति अतीव सुन्दरम्। मया एका अपराध-वार्ता प्राप्ता। 'बीवर' क्रीडाङ्गणे एकः विवादः जातः। तत्र एकेन दर्शकेन वैद्यकीय-सेवकः दष्टः! अतः सः रक्षकैः बद्धः।

**नन्दिनी-** अहो वैपरीत्यम्! साहाय्यं कुर्वन् एव दष्टः। सत्यम्, अतीव विचित्राः एताः वार्ताः। अद्यतनः कार्यक्रमः अत्रैव समाप्तः।

# श्लोकव्यञ्जनव्यञ्जना

ककारं कमलाकान्तं कृष्णञ्च करुणाकरम्।
कृत्स्नकर्मविनाशाय कविकर्मणि कामय ।१।
खगासनं समाराध्य ख्यातिमान् धनधान्यवान्।
खेदताञ्च विनिष्कृत्य खादतमोदता भव।२।
गरुडवाहनं ध्यात्वा गमनागमनं कुरु।
गर्वं सर्वं विहायाशु ज्ञायतां भगवान् गुरुः।३।
घनश्यामं समाराध्य घोरदुःखात् विमुच्यताम्।
घृतपक्वान् समासाद्य घनागमे च रम्यताम्।४।
चाञ्चल्यं त्वं परित्यज्य चन्द्रमौलिपरायणः।
चर्चयन् शास्त्रसम्भारं चर्चासत्रेषु सञ्चर।५।
छित्वा छित्वा तमोऽज्ञानं छन्नज्ञानं प्रकाशय।
छात्रान् सर्वान् समाहूय छान्दसं परिभावय।६।
जङ्गम्यतां जगज्जातं जनार्दनसमाधितः।
ज्यायञ्चैव समासाद्य जीयतां शतवत्सरम् ।७।
झषकेतनसंवादो झञ्झावातसमः किल।
झटिति तं निराकृत्य झङ्कारिण्यां समाचर।८।
तरतात् सत्वरं भ्रातः! तत्तत्त्वे तृप्यतां तथा।
तत्कथां तरलीकृत्य तत्स्थाने तप्यतां ततः।९।
दुरन्तं त्वां न प्राप्नोमि दयस्व मे दयाकरः।
दम्भं दर्पं सुदारुणं दारयित्वा प्रदीपय।१०।
धीरता धीयतां ध्याने धैर्यञ्चैव धनागमे।
धूयतां ध्वनितो धाता धावं धावं दधातु मे।११।
नरस्य नर्तनं नाथ! नेह नानास्ति किञ्चन।
नेति नेति विनिन्द्यापि नाप्नोति त्वां नरोत्तम! ।१२।
पुरतः पुरतः पात्वा पृष्ठतः पृष्ठतश्चर।
परितः परितः प्रायः पाहि मां परमेश्वर!।१३।
बलदेवं बृहत्कायं बहुज्ञातं बुधेश्वरम्।
ब्रह्मिष्ठं बाहुबल्यञ्च बाहुल्येन विन्दाम्यहम्।१४।
भूरिशो भूरिशो भूयात् भारते भारतीकथा।
भ्राजतां भ्राजतां भूयो भूतले भारतं तथा।१५।
मैथुनं मद्यमांसञ्च मनोमानादिमत्सरम्।
मदं मान्द्यं महामोहं मिषं मन्युं न मन्यताम्।१६।
युज्यते योग्यता यत्र याथातथ्येन युक्तितः।
युगपत् योगयुक्तेन याहि तत्र यशस्करम्।१७।
रम्यतां रम्यतां रामे रस्यतां रस्यतां रसे।
रज्यतां रज्यतां रायि राजतां राजतां रतौ।१८।
लक्ष्मीर्लीलायते लोला लोकोल्लाससुलग्नके।
लोक्यते लुप्यते लक्ष्ये लभ्यते चापि लुण्ठके।१९।
विष्णुं विश्वेश्वरं व्याप्तं विशालं वियदम्बरम्।
वृणोमि विविधाकारं विशेषेण विचक्षणम्।२०।
शान्तमतिं समाधाय शङ्करं सततं स्मर।
शुभं सर्वं समासाद्य शन्तमं सुस्थिरं चर।२१।
षड्वादने समुत्थाय षड्विकारविवर्जितः।
षडाननसमस्सम्यक् षाड्गुण्येन समाचर।२२।
सूर्यदेवं नमस्कृत्य सन्तमस्ते विनश्यताम्।
सम्यक् कार्यं समाधाय सन्ततं शान्तिमाप्नुहि।२३।
हुत्वा हरिहरं ह्यत्र हविर्भिश्च हुताशने।
हलायुधं हयग्रीवमाह्वय हृदयङ्गमम्।२४।
क्षुल्लकार्यं न वक्तव्यं क्षुद्रध्यानात् विमुच्यताम्।
क्षुत्पिपासां समीकृत्य क्षणं क्षणन्नु रम्यताम्।२५।
गीतं समस्वरायुक्तं लयतालसमन्वितम्।
मधुरध्वनिसंयुक्तं श्लोकव्यञ्जनाव्यञ्जनम्।२६।
रुरुणा कविना प्रोक्तं काव्यमिदं मनोहरम्।
शृण्वन्तु सादरं सम्यक् सत्यं शिवञ्च सुन्दरम्।२७।
इति श्रीमधुमधुरध्वनिधारणसमुच्चारणे
सहृदयहृदयस्पन्दने सरसरसरासरसने
श्लोकव्यञ्जनव्यञ्जनेति काव्यश्रवणे
मोदन्तां रसिका भुवि भावुकास्सदा
अमन्दानन्दसन्दोहः विलसतुतरां
नितराम् इह ॐ नमः ॐ ॐ ॐ ।।



**रचयिता- आचार्यः**
**डॉ. रुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्व-विद्यालयः, तिरुपतिः**